UGC - CARE LISTED

ISSN: 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया त्रैमासिकी शोध-पत्रिका

# शोध-प्रभा

(A Refereed & Peer-Reviewed Quarterly Research Journal)

44 वर्षे चतुर्थोऽङ्कः (अक्टूबरमासाङ्कः) 2019

प्रधानसम्पादकः

प्रो.रमेशकुमारपाण्डेयः

कुलपतिः

सम्पादकः

प्रो.शिवशङ्करमिश्रः

सहसम्पादकः

डॉ.ज्ञानधरपाठकः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितः, मानितविश्वविद्यालयः)

नवदेहली-16

# विषयानुक्रमणिका

## संस्कृतविभागः


| | | |
|---|---|---|
| 1. पूर्वोत्तरमीमांसादर्शनयोर्देवतातत्त्वम् | प्रो. रामानुज उपाध्यायः | 1-4 |
| 2. विशिष्टाद्वैतमते ब्रह्मणः सर्वशब्दवाच्यत्वम् | प्रो. के. अनन्तः | 5-9 |
| 3. न्यायदर्शनीयविशिष्टशक्तिवादविमर्शः | डॉ. रामचन्द्रशर्मा | 10-16 |
| 4. विलियमवर्ड्स्वर्थप्रतिपादितानां साहित्यिकसमीक्षासिद्धान्तानां विमर्शः | डॉ. सुमनकुमारझाः | 17-26 |
| 5. बौद्धशिक्षायां मानवधर्मः | डॉ. ऋषिराजः | 27-31 |
| 6. 'जानकीजीवन' महाकाव्ये युगबोधविमर्शः | डॉ. दिनेशकुमारगर्गः | 32-38 |
| 7. पुराणेषु वृक्षायुर्ज्ञानम् | श्रीखेमराजरेग्मी | 39-43 |
| 8. प्राच्यपाश्चात्यमतयोरयनांशस्वरूपम् | श्रीअरुणशर्मा | 44-47 |
| 9. आचार्यविश्वनाथकृतध्वन्यालोकमतखण्डनस्य लोचनदिशामण्डनम् | श्रीरविकान्तो भारद्वाजः | 48-52 |

शोधप्रभा
ाC - CARE Listed
वर्ष : 44, चतुर्थोऽङ्कः
टूबर-दिसम्बर, 2019

# विशिष्टाद्वैतमते ब्रह्मणः सर्वशब्दवाच्यत्वम्

प्रो. के. अनन्तः*

कौषीतकीब्राह्मणे प्रतर्दनविद्यायां[1] ''प्रतर्दनो ह वै दैवोदासिरिन्द्रस्य प्रियं धामोपजगाम न च पौरुषेण च इत्यारभ्य वरं वृणीष्वेति वक्तारमिन्द्रं प्रति त्वमेव मे वरं वृणीष्व वं मनुष्याय हिततमं मन्यसे इति प्रतर्दनेनोक्ते'' ''स होवाच प्राणोऽस्मि प्रज्ञात्मा तं मा रमृतमित्युपास्व'' इति श्रूयते। तत्र हिततमोपासन कर्मतया इन्द्रोच्चारित ''माम्'' निर्दिष्टः किमिन्द्राख्योजीव उत तदतिरिक्तः परमात्मा इति विषये जीव इति पूर्वपक्षं ा तं निरस्य परमात्मेति स्थापयित्वा मामितिशब्देन कथं परमात्मनिर्देश इति कासमाधानायोक्तं सूत्रकारेण-''शास्त्रदृष्ट्या तूपदेशो वामदेववत्''[2] इति। तत्र च ाष्ये ''अनेनजीवेनात्मनानुप्रविश्य नामरूपे व्याकरवाणि''[3], ''ऐतदात्म्यमिदं सर्वं''[4], न्तःप्रविष्टश्शास्ता जनानां सर्वात्मा''[5] य आत्मनि तिष्ठन्नात्मनोऽन्तरः यमात्मा न वेद ात्मा शरीरम्, य आत्मानमन्तरो यमयति एष सर्वभूतान्तरात्मा अपहतपाप्मा दिव्यो एको नारायणः[6] इत्येवमादिना शास्त्रेण जीवात्मकशरीरं परमात्मानमवगम्य जीवात्मवाचिनां त्वमादिशब्दानामपि परमात्मनि पर्यवसानं ज्ञात्वा ''मामुपास्व'' इति स्वात्मकशरीरं ात्मानमेव उपास्यत्वेनोपदिदेश इति प्रतिपादितम्। एतेन सर्वे शब्दाः तत्तच्छरीरक ात्मपर्यन्तवाचकाः इति स्वसिद्धान्त आवेदितः।

एवं साक्षादप्यविरोधं जैमिनिः इति सूत्रे[7] एवमग्निशब्देति अग्रनयनादिना येन ा योजने ज्वलने वर्तते, तस्यैव गुणस्य निरूपाधिकस्य काष्ठागतस्य परमात्मनि ात् अस्मिन्प्रकरणे परमात्मासाधारणधर्मविशेषितः परमात्मानमेवाभिधत्त इति भाष्येण शब्दाः योगव्युत्पत्या परमात्मवाचका इति पक्षान्तरमुपन्यस्तम्।

---

*ाशिष्टाद्वैतवेदान्तविभागाध्यक्षः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली

1. ौ.उ.3-1
2. सू.1-1-30
3. .उ.6-23
4. .उ.6-24
5. आ.3-11
6. उ.3-66
7. सू.1-2-29